श्री मूकांबिक अष्टोत्तर शतनामावळिः

1. श्री चन्द्रमौळीश्वर परब्रह्मणे नमः !
2. ॐ श्रीनाथादितनूत्थश्रीमहाक्ष्म्यै नमो नमः
3. ॐ भवभावित चित्तेजः स्वरूपिण्यै नमो नमः
4. ॐ कृतानङ्गवधूकोटि सौन्दर्यायै नमो नमः
5. ॐ उद्यदादित्यसाहस्रप्रकाशायै नमो नमः
6. ॐ देवतार्पितशस्त्रास्त्रभूषणायै नमो नमः
7. ॐ शरणागत सन्त्राणनियोगायै नमो नमः
8. ॐ सिंहराजवरस्कन्धसंस्थितायै नमो नमः
9. ॐ अट्टहासपरित्रस्तदैत्यौघायै नमो नमः
10. ॐ महामहिषदैत्येन्द्रविघातिन्यै नमो नमः
11. ॐ पुरन्दरमुखामर्त्यवरदायै नमो नमः ॥ 10 ॥
12. ॐ कोलर्षिप्रवरध्यानप्रत्ययायै नमो नमः
13. ॐ श्रीकण्ठक्लृप्तश्रीचक्रमध्यस्थायै नमो नमः
14. ॐ मिथुनाकारकलितस्वभावायै नमो नमः
15. ॐ इष्टानुरूपप्रमुखदेवतायै नमो नमः
16. ॐ तप्तजाम्बूनदप्रख्यशरीरायै नमो नमः
17. ॐ केतकीमालतीपुष्पभूषितायै नमो नमः
18. ॐ विचित्ररत्नसंयुक्तकिरीटायै नमो नमः
19. ॐ रमणीयद्विरेफालिकुन्तलायै नमो नमः
20. ॐ अर्धशुभ्रांशु विभ्राजल्ललाटायै नमो नमः
21. ॐ मुखचन्द्रान्तकस्तूरीतिलकयै नमो नमः ॥ 20 ॥
22. ॐ मनोज्ञवक्रभ्रूवल्लीयुगलायै नमो नमः
23. ॐ रजनीशदिनेशाग्निलोचनायै नमो नमः
24. ॐ करुणारससंसिक्तनेत्रान्तायै नमो नमः
25. ॐ चाम्पेयकुसुमोद्भासिनासिकायै नमो नमः
26. ॐ तारकाभनसारत्नभासुरायै नमो नमः
27. ॐ सद्रत्नखचितस्वर्णताटङ्कायै नमो नमः

28. ॐ रत्नादर्शप्रतीकाशकपोलायै नमो नमः
29. ॐ ताम्बूलशोभितवरस्मितास्यायै नमो नमः
30. ॐ कुन्दकुट्मलसङ्काशदशनायै नमो नमः
31. ॐ फुल्लप्रवालरदनवसनायै नमो नमः ॥ 30 ॥
32. ॐ स्वकान्तस्वान्तविक्षोभिचिबुकायै नमो नमः
33. ॐ मुक्ताहारलसत्कम्बुकन्धरायै नमो नमः
34. ॐ साष्टापदाङ्गदभुजचतुष्कायै नमो नमः
35. ॐ शङ्खचक्रवराभीतिकराब्जायै नमो नमः
36. ॐ मतङ्गजमहाकुम्भवक्षोजायै नमो नमः
37. ॐ कुचभारनमन्मञ्जुमध्यमायै नमो नमः
38. ॐ तटित्पुञ्जाभकौशेयसुचेलायै नमो नमः
39. ॐ रम्यकिङ्किणिकाकाञ्चीरञ्जितायै नमो नमः
40. ॐ अतिमञ्जुलरम्भोरुद्वितयायै नमो नमः
41. ॐ माणिक्यमुकुटाष्ठीवसंयुक्तायै नमो नमः ॥ 40 ॥
42. ॐ देवेशमुकुटोद्दीप्तपदाब्जायै नमो नमः
43. ॐ भार्गवाराध्यगाङ्घ्रेयपादुकायै नमो नमः
44. ॐ मत्तदन्तावलोत्तंसगमनायै नमो नमः
45. ॐ कुङ्कुमागरुभद्रश्रीचर्चिताङ्ग्यै नमो नमः
46. ॐ सचामरामरीरत्नवीजितायै नमो नमः
47. ॐ प्रणताखिलसौभाग्यप्रदायिन्यै नमो नमः
48. ॐ दानवार्दितशक्रादिसन्नुतायै नमो नमः
49. ॐ धूम्रलोचन दैतेयदहनायै नमो नमः
50. ॐ चण्डमुण्डमहाशीर्षखण्डनायै नमो नमः
51. ॐ रक्तबीजमहादैत्यशिक्षकायै नमो नमः ॥ 50 ॥
52. ॐ मदोद्धतनिशुम्भाख्यभञ्जनायै नमो नमः
53. ॐ घोरशुम्भासुराधीशनाशनायै नमो नमः
54. ॐ मधुकैटभसंहारकारणायै नमो नमः
55. ॐ विरिञ्चिमुखसङ्गीतसमज्ञायै नमो नमः
56. ॐ सर्वबाधाप्रशमनचरित्रायै नमो नमः

57. ॐ समाधिसुरथक्ष्माभृदर्चितायै नमो नमः
58. ॐ मार्कण्डेयमुनिश्रेष्ठसंस्तुतायै नमो नमः
59. ॐ व्यालासुरद्विषद्विष्णुस्वरूपिण्यै नमो नमः
60. ॐ क्रूरवेत्रासुरप्राणमारणायै नमो नमः
61. ॐ लक्ष्मीसरस्वतीकालीवेषाढ्यायै नमो नमः ॥ 60 ॥
62. ॐ सृष्टिस्थितिलयक्रीडातत्परायै नमो नमः
63. ॐ ब्रह्मोपेन्द्रगिरीशादिप्रतीक्षायै नमो नमः
64. ॐ अमृताब्धिमणिद्वीपनिवासिन्यै नमो नमः
65. ॐ निखिलानन्दसन्दोहविग्रहायै नमो नमः
66. ॐ महाकदम्बविपिनमध्यगायै नमो नमः
67. ॐ अनेककोटिब्रह्माण्डजनन्यै नमो नमः
68. ॐ मुमुक्षुजनसन्मार्गदर्शिकायै नमो नमः
69. ॐ द्वादशान्तषडम्भोजविहारायै नमो नमः
70. ॐ सहस्रारमहापद्मसदनायै नमो नमः
71. ॐ जन्मप्रमुखषड्भाववर्जितायै नमो नमः ॥ 70 ॥
72. ॐ मूलाधारादिषट्चक्रनिलयायै नमो नमः
73. ॐ चराचरात्मकजगत्सम्प्रोतायै नमो नमः
74. ॐ महायोगिजनस्वान्तनिशान्तायै नमो नमः
75. ॐ सर्ववेदान्तसत्सारसंवेद्यायै नमो नमः
76. ॐ हृदिनिक्षिप्तनिःशेषब्रह्माण्डायै नमो नमः
77. ॐ राजराजेश्वरप्राणवल्लभायै नमो नमः
78. ॐ तुषाराचलराजन्यतनयायै नमो नमः
79. ॐ सर्वात्मपुण्डरीकाक्षसहोदर्यै नमो नमः
80. ॐ मूकीकृतमहामूकदानवायै नमो नमः
81. ॐ दुष्टमूकशिरः शैलकुलिशायै नमो नमः ॥ 80 ॥
82. ॐ कुटजोपत्यकामुख्यनिवासायै नमो नमः
83. ॐ वरेण्यदक्षिणार्धाङ्गमहेशायै नमो नमः
84. ॐ ज्योतिश्चक्रासनाभिख्यपीठस्थायै नमो नमः
85. ॐ नवकोटिमहदुर्गासंवृतायै नमो नमः

86. ॐ विघ्नेशस्कन्दवीरेशवत्सलायै नमो नमः
87. ॐ कलिकल्मषविध्वंससमर्थायै नमो नमः
88. ॐ षोडशार्णमहामन्त्रमन्दिरायै नमो नमः
89. ॐ पञ्चप्रणवलोलम्बपङ्कजायै नमो नमः
90. ॐ मिथुनार्चनसंहृष्टहृदयायै नमो नमः
91. ॐ वसुदेवमनोभीष्टफलदायै नमो नमः ॥ 90 ॥
92. ॐ कंसासुरवरारातिपूजितायै नमो नमः
93. ॐ रुक्मिणीसत्यभामादिवन्दितायै नमो नमः
94. ॐ नन्दगोपप्रियागर्भसम्भूतायै नमो नमः
95. ॐ कंसप्राणापहरणसाधनायै नमो नमः
96. ॐ सुवासिनीवधूपूजासुप्रीतायै नमो नमः
97. ॐ शशाङ्कशेखरोत्सङ्गविष्ठरायै नमो नमः
98. ॐ विभुधारिकुलारण्यकुठारायै नमो नमः
99. ॐ सञ्जीवनौषधत्रातत्रिदशायै नमो नमः
100. ॐ मातृसौख्यार्थि पक्षीशसेवितायै नमो नमः
101. ॐ कटाक्षलब्धशक्रत्व प्रद्युम्नायै नमो नमः ॥ 100 ॥
102. ॐ इन्द्रक्लृप्तोत्सवोत्कृष्टप्रहृष्टायै नमो नमः
103. ॐ दारिद्र्यदुःखविच्छेदनिपुणायै नमो नमः
104. ॐ अनन्यभावस्वर्गापवर्गदायै नमो नमः
105. ॐ अप्रपन्न भवत्रासदायकायै नमो नमः
106. ॐ निर्जिताशेषपाषण्डमण्डलायै नमो नमः
107. ॐ शिवाक्षिकुमुदाह्लादचन्द्रिकायै नमो नमः
108. ॐ प्रवर्तितमहाविद्याप्रधानायै नमो नमः
109. ॐ सर्वशक्त्यैकरूप श्रीमूकाम्बायै नमो नमः ॥ 108 ॥

|| **इति श्री मूकांबिक शतनामावळि संपूर्णं** ||